# Abhinayadarpanam by Nandikeshvara

# નન્દિકેશ્વરવિરચિતમ્ અભિનયદર્પણમ્

## Document Information

Text title : abhinayadarpaNam

File name : abhinayadarpaNam.itx

Category : nATyashAstra, major_works

Location : doc_z_misc_major_works

Author : Nandikeshvara

Transliterated by : Ryan Armstrong ryanarm at gmail.com

Proofread by : Ryan Armstrong, Krithi Durbaka

Latest update : February 14, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નન્દિકેશ્વરવિરચિતમ્ અભિનયદર્પણમ્

## નમસ્ક્રિયા

આઙ્ગિકં ભુવનં યસ્ય વાચિકં સર્વવાઙ્મયમ્ ।
આહાર્યં ચન્દ્રતારાદિ તં નુમઃ સાત્ત્વિકં શિવમ્ ॥ ૧॥

## નાટ્યોત્પત્તિઃ

નાટ્યવેદં દદૌ પૂર્વં ભરતાય ચતુર્મુખઃ ।
તતશ્ચ ભરતઃ સાર્ધં ગન્ધર્વાપ્સરસાં ગણૈઃ ॥ ૨॥

નાટ્ય નૃત્તં તથા નૃત્યમગ્રે શમ્ભોઃ પ્રયુક્તવાન્ ।
પ્રયોગમુદ્ધતં સ્મૃત્વા સ્વપ્રયુક્તં તતો હરઃ ॥ ૩॥

તણ્ડુના સ્વગણાગ્રણ્યા ભરતાય ન્યદીદિશત્ ।
લાસ્યમસ્યાગ્રતઃ પ્રીત્યા પાર્વત્યા સમદીદિશત્ ॥ ૪॥

બુદ્ધ્વાઽથ તણ્ડવં તાણ્ડોર્મર્ત્યેભ્યો મુનયોઽવદન્ ।
પાર્વતી ત્વનુશાસ્તિ સ્મ લાસ્યં બાણાત્મજામુષામ્ ॥ ૫॥

તયા દ્વારવતીગોપ્યસ્તાભિઃ સૌરાષ્ટ્રયોષિતઃ ।
તાભિસ્તુ તત્તદ્દેશીયાસ્તદશિષ્યન્ત યોષિતઃ ॥ ૬॥

એવં પરમ્પરાપ્રાપ્તમેત્તલ્લોકે પ્રતિષ્ઠિતમ્ ।

## નાટ્યપ્રશંસા

ઋગ્યજુઃ સામવેદેભ્યો વેદાચ્ચાથર્વણઃ ક્રમાત્ ॥ ૭॥

પાઠ્યં ચાભિનયં ગીતં રસાન્ સઙ્ગૃહ્ય પદ્મજઃ ।
વ્યરીરચચ્છાસ્ત્રમિદં ધર્મકામાર્થમોક્ષદમ્ ॥ ૮॥

કીર્તિપ્રાગલ્ભ્યસૌભાગ્યવૈદગ્ધ્યાનાં પ્રવર્ધનમ્ ।
ઔદાર્યસ્થૈર્યધૈર્યાણાં વિલાસસ્ય ચ કારણમ્ ॥ ૯॥

દુઃખાર્તિશોકનિર્વેદખેદવિચ્છેદકારણમ્ ।
અપિ બ્રહ્મપરાનન્દાદિદમભ્યધિકં મતમ્ ॥ ૧૦॥

જહાર નારદાદીનાં ચિત્તાનિ કથમન્યથા ।

## નટનભેદાઃ

એતચ્ચતુર્વિધોપેતં નટનં ત્રિવિધં સ્મૃતમ્ ॥ ૧૧॥

નાટ્યં નૃત્તં નૃત્યમિતિ મુનિભિર્ભરતાદિભિઃ ।

## નટનપ્રયોગકાલઃ

દ્રષ્ટવ્યે નાટ્યનૃત્યે ચ પર્વકાલે વિશેષતઃ ॥ ૧૨॥

નૃત્તં તત્ર નરેન્દ્રાનામભિષેકે મહોત્સવે ।
યાત્રાયાં દેવયાત્રાયાં વિવાહે પ્રિયસઙ્ગમે ॥ ૧૩॥

નગરાણામગારાણાં પ્રવેશે પુત્રજન્મનિ ।
શુભાર્થિભિઃ પ્રયોક્તવ્યં માઙ્ગલ્યં સર્વકર્મભિઃ ॥ ૧૪॥

## નાટ્યં

નાટ્યં તન્નાટકં ચૈવ પૂજ્યં પૂર્વકથાયુતમ્ ।

## નૃત્તં

ભાવાભિનયહીનં તુ નૃત્તમિત્યભિધીયતે ॥ ૧૫॥

## નૃત્યં

રસભાવવ્યઞ્જનાદિયુક્તં નૃત્યમિતીર્યતે ।
એતન્નૃત્યં મહારાજસભાયાં કલ્પયેત્ સદા ॥ ૧૬॥

સભાપતિલક્ષણં –
શ્રીમાન્ ધીમાન્ વિવેકી વિતરણનિપુણો ગાનવિદ્યાપ્રવીણઃ
 સર્વજ્ઞઃ કીર્તિશાલી સરસગુણયુતો હાવભાવેષ્વભિજ્ઞઃ ।
માત્સર્યદ્વેષહીનઃ પ્રકૃતિહિતસદાચારશીલો દયાલુ-
 ર્ધીરો દાન્તઃ કલાવાનભિનયચતુરોઽસૌ સભાનાયકઃ સ્યાત્ ॥ ૧૭॥

મન્ત્રિલક્ષણં –
મેધાસુસ્થિરભાષણગુણપરાઃ શ્રીમદ્યશોલમ્પટા
 ભાવજ્ઞા ગુણદોષભેદનિપુણાઃ શ‍ૃઙ્ગારલીલાયુતાઃ ।
મધ્યસ્થા નયકોવિદાઃ સહૃદયાઃ સત્પણ્ડિતા ભાન્તિ તે
 ભાષાભેદવિચક્ષણાઃ સુકવયો અસ્ય પ્રભોર્મન્ત્રિણઃ ॥ ૧૮॥

સભાલક્ષણં –
સભાકલ્પતરુર્ભાતિ વેદશાખોપજીવિતઃ ।
શાસ્ત્રપુષ્પસમાકીર્ણો વિદ્વદ્ભ્રમરશોભિતઃ ॥ ૧૯॥

## સભારચના

એવંવિધઃ સભાનાથઃ પ્રાઙ્મુખો નિવિશેન મુદા ।
વર્તેરન્ પાર્શ્વયોસ્તસ્ય કવિમન્ત્રિસુહૃજ્જનાઃ ॥ ૨૦॥

તદગ્રે નટનં કુર્યાત્ તત્ સ્થલં રઙ્ગ ઉચ્યતે ।
રઙ્ગમધ્યે સ્થિતે પાત્રે તત્સમીપે નટોત્તમઃ ॥ ૨૧॥

દક્ષિણે તાલધારી ચ પાર્શ્વદ્વન્દ્વે મૃદઙ્ગકૌ ।
તયોર્મધ્યે ગીતકારી શ્રુતિકારસ્તદન્તિકે ॥ ૨૨॥

એવં તિષ્ઠેત્ ક્રમેણૈવ નાટ્યાદૌ રઙ્ગમણ્ડલી ।
પાત્રલક્ષણં –
તન્વી રૂપવતી શ્યામા પીનોન્નતપયોધરા ॥ ૨૩॥

પ્રગલ્ભા સરસા કાન્તા કુશલા ગ્રહમોક્ષયોઃ ।
વિશાલલોચના ગીતવાદ્યતાલાનુવર્તિની ॥ ૨૪॥

પરાર્ધ્યભૂષાસમ્પન્ના પ્રસન્નમુખપઙ્કજા ।
એવંવિધગુણોપેતા નર્તકી સમુદીરિતા ॥ ૨૫॥

વર્જનીયપાત્રાણિ –
પુષ્પાક્ષી કેશહીના ચ સ્થૂલોષ્ઠી લમ્બિતસ્તની ।
અતિસ્થૂલાપ્યતિકૃશા અત્યુચ્ચાપ્યતિવામના ॥ ૨૬॥

કુબ્જા ચ સ્વરહીના ચ દશૈતા નાટ્યવર્જિતાઃ ।
પાત્રસ્ય પ્રાણાઃ –
જવઃ સ્થિરત્વં રેખા ચ ભ્રમરી દૃષ્ટિરશ્રમઃ ॥ ૨૭॥

મેધા શ્રદ્ધા વચો ગીતં પાત્રપ્રાણા દશ સ્મૃતાઃ ।
એવંવિધેન પાત્રેણ નૃત્યં કાર્યં વિધાનતઃ ॥ ૨૮॥

## કિઙ્કિણીલક્ષણં

સુસ્વરાશ્ચ સુરૂપાશ્ચ સૂક્ષ્મા નક્ષત્રદેવતાઃ ।
કિઙ્કિણ્યઃ કાંસ્યરચિતા એકૈકાઙ્ગુલિકાન્તરમ્ ॥ ૨૯॥

બધ્નીયાન્નીલસૂત્રેણ ગ્રન્થિભિશ્ચ દૃઢં પુનઃ ।
શતદ્વયં શતં વાપિ પાદયોર્નાટ્યકારિણી ॥ ૩૦॥

પ્રાર્થનાદિકં –
વિઘ્નેશં મુરજાધિપં ચ ગગનં સ્તુત્વા મહીં પ્રાર્થયેત્
    તત્તદ્વાદ્યકદમ્બકસ્ય વિધિના પૂજાવિધામાનયેત્ ।
આલપ્યાતિમનોહરાન્ બહુવિધીન્ સમ્પાદ્ય ભૂયસ્તથા
    ગુર્વાજ્ઞામવલમ્બ્ય પાત્રમુચિતં શ◌ૃઙ્ગારમેવારભેત્ ॥ ૩૧॥

રઙ્ગાધિદેવતાસ્તુતિઃ –
ભરતકુલભાગ્યકલિકે ભાવરસાનન્દપરિણતાકારે ।
જગદેકમોહનકલે જય જય રઙ્ગાધિદેવતે દેવિ ॥ ૩૨॥

## પુષ્પાઞ્જલિઃ

વિઘ્નાનાં નાશનં કર્તું ભૂતાનાં રક્ષણાય ચ ।
દેવાનાં તુષ્ટયે ચાપિ પ્રેક્ષકાણાં વિભૂતયે ॥ ૩૩॥

શ્રેયસે નાયકસ્યાત્ર પાત્રસંરક્ષણાય ચ ।
આચાર્યશિક્ષાસિદ્ધાર્થં પુષ્પાઞ્જલિમથારભેત્ ॥ ૩૪॥

## નાટ્યક્રમઃ

એવં કૃત્વા પૂર્વરઙ્ગં નૃત્યં કાર્યં તતઃ પરમ્ ।
નૃત્યં ગીતાભિનયનં ભાવતાલયુતં ભવેત્ ॥ ૩૫॥

આસ્યેનાલમ્બયેદ્ ગીતં હસ્તેનાર્થં પ્રદર્શયેત્ ।
ચક્ષુર્ભ્યાં દર્શયેદ્ ભાવં પાદાભ્યાં તાલમાચરેત્ ॥ ૩૬॥

યતો હસ્તસ્તતો દૃષ્ટિર્યતો દૃષ્ટિસ્તતો મનઃ ।
યતો મનસ્તતો ભાવો યતો ભાવસ્તતો રસઃ ॥ ૩૭॥

## અભિનયઃ

તત્ર ત્વભિનયસ્યૈવ પ્રાધાન્યમિતિ કથ્યતે ।
આઙ્ગિકો વાચિકસ્તદ્વદાહાર્યઃ સાત્વિકોઽપરઃ ॥ ૩૮॥

ચતુર્ધાભિનયસ્ -

## આઙ્ગિકાભિનયઃ

તત્ર આઙ્ગિકોઽઙ્ગૈર્નિદર્શિતઃ ।

## વાચિકાભિનયઃ

વાચા વિરચિતઃ કાવ્યનાટકાદિ તુ વાચિકઃ ॥ ૩૯॥

## આહાર્યાભિનયઃ

આહાર્યો હારકેયૂરવેષાદિભિરલઙ્કૃતઃ ।

## સાત્ત્વિકાભિનયઃ

સાત્ત્વિકઃ સાત્ત્વિકૈર્ભાવૈર્ભાવજ્ઞેન વિભાવિતઃ ॥ ૪૦॥

સ્તમ્ભઃ સ્વેદામ્બુ રોમાઞ્ચઃ સ્વરભઙ્ગોઽથ વેપથુઃ ।
વૈવર્ણ્યમશ્રુ પ્રલય ઇત્યષ્ટૌ સાત્ત્વિકાઃ સ્મૃતાઃ ॥ ૪૧॥

## આઙ્ગિકાભિનયસાધનાનિ

તત્રાઙ્ગિકોઽઙ્ગપ્રત્યઙ્ગોપાઙ્ગૈસ્ત્રેધા પ્રકાશતઃ ।

## અઙ્ગાનિ

અઙ્ગાન્યસ્ત્ર શિરો હસ્તૌ વક્ષઃ પાર્શ્વૌ કટીતટૌ ॥ ૪૨॥

પાદાવિતિ ષડુક્તાનિ ગ્રીવામપ્યપરે જગુઃ ॥

## પ્રત્યઙ્ગાનિ

પ્રત્યઙ્ગાન્યથ ચ સ્કન્ધૌ બાહૂ પૃષ્ઠં તથોદરમ્ ॥ ૪૩॥

ઊરૂ જઙ્ઘે ષડિત્યાહુરપરે મણિબન્ધકૌ ।
જાનુની કૂર્પરાવેતત્ ત્રયમપ્યધિકં જગુઃ ॥ ૪૪॥

## ઉપાઙ્ગાનિ

ગ્રીવા સ્યાદપ્યુપાઙ્ગન્તુ સ્કન્ધ એવં જગુર્બુધાઃ ।
દૃષ્ટિભ્રૂપુટતારાશ્ચ કપોલૌ નાસિકા હનૂ ॥ ૪૫॥

અધરો દશના જિહ્વા ચુબુકં વદનં તથા ।
ઉપાઙ્ગાનિ દ્વાદશૈવ શિરસ્યઙ્ગાન્તરેષુ ચ ॥ ૪૬॥

પાર્ષ્ણિગુલ્ફૌ તથાઙ્ગુલ્યઃ કરયોઃ પાદયોસ્તલે ।
એતાનિ પૂર્વશાસ્ત્રાનુસારેણોક્તાનિ વૈ મયા ॥ ૪૭॥

નૃત્યમાત્રોપયોગીનિ કથ્યન્તે લક્ષણૈઃ ક્રમાત્ ।
અઙ્ગાનાં ચલનાદેવ પ્રત્યઙ્ગોપાઙ્ગયોરપિ ॥ ૪૮॥

ચલનં પ્રભવેત્તસ્માત્ સર્વેષાં નાત્ર લક્ષણમ્ ।
શિરોભેદાઃ –
સમમુદ્વાહિતમધોમુખમાલોલિતં ધુતમ્ ॥ ૪૯॥

કમ્પિતં ચ પરાવૃત્તમુત્ક્ષિપ્તં પરિવાહિતમ્ ।
નવધા કથિતં શીર્ષં નાટ્યશાસ્ત્રવિશારદૈઃ ॥ ૫૦॥

સમશિરઃ –
નિશ્ચલં સમમાખ્યાતં યન્નત્યુન્નતિવર્જિતમ્ ।
વિનિયોગઃ –
નૃત્યારમ્ભે જપાદૌ ચ ગર્વે પ્રણયકોપયોઃ ॥ ૫૧॥

સ્તમ્ભને નિષ્ક્રિયત્વે ચ સમશીર્ષમુદાહૃતમ્ ।
ઉદ્વાહિતશિરઃ –
ઉદ્વાહિતશિરો જ્ઞેયમૂર્ધ્વભાગોન્નતાનનમ્ ॥ ૫૨॥

વિનિયોગઃ –
ધ્વજે ચન્દ્રે ચ ગગને પર્વતે વ્યોમગામિષુ ।
તુઙ્ગવસ્તુનિ સંયોજ્યમુદ્વાહિતશિરો બુધૈઃ ॥ ૫૩॥

અધોમુખશિરઃ –
અધસ્તાન્નમિતં વક્ત્રમધોમુખમિતીરિતમ્ ।
વિનિયોગઃ –
લજ્જાખેદપ્રણામેષુ દુશ્ચિન્તામૂર્છયોસ્તથા ॥ ૫૪॥

અધઃસ્થિતાર્થનિર્દેશે યુજ્યતેઽમ્બુનિ મજ્જને ।
આલોલિતશિરઃ –
મણ્ડલાકારમુદ્ભ્રાન્તમાલોલિતં શિરો ભવેત્ ॥ ૫૫॥

વિનિયોગઃ –
નિદ્રોદ્વેગગ્રહાવેશમદમૂર્છાસુ તન્મતમ્ ।
ભ્રમણે વિકટોદ્દામહાસ્યે ચાલોલિતં શિરઃ ॥ ૫૬॥

ધુતશિરઃ –
વામદક્ષિણભાગેષુ ચલિતં તદ્ધુતં શિરઃ ।
વિનિયોગઃ –
નાસ્તીતિ વચને ભૂયઃ પાર્શ્વદેશાવલોકને ॥ ૫૭॥

જનાશ્વાસે વિસ્મયે ચ વિષાદેઽનીપ્સિતે તથા ।
શીતાર્તે જ્વરિતે ભીતે સદ્યઃપીતાસવે તથા ॥ ૫૮॥

યુદ્ધે યત્ને નિષેધાદાવમર્ષે સ્વાઙ્ગવીક્ષણે ।
પાર્શ્વાહ્વાને ચ તસ્યોક્તઃ પ્રયોગો ભરતાદિભિઃ ॥ ૫૯॥

કમ્પિતશિરઃ –

ઊર્ધ્વાધોભાગચલિતં તચ્છિરઃ કમ્પિતં ભવેત્ ।
વિનિયોગઃ –
રોષે તિષ્ઠેતિ વચને પ્રશ્ને સઙ્ખ્યોપહૂતયોઃ ॥ ૬૦॥

આવાહને તર્જને ચ કમ્પિતં વિનિયુજ્યતે ।
પરાવૃત્તશિરઃ –
પરાઙ્મુખીકૃતં શીર્ષં પરાવૃત્તમિતીરિતમ્ ॥ ૬૧॥

વિનિયોગઃ –
તત્ કાર્યં કોપલજ્જાદિકૃતે બક્ત્રાપસરણે ।
અનાદરે કચે તૂણ્યાં પરાવૃત્તશિરો ભવેત્ ॥ ૬૨॥

ઉત્ક્ષિપ્તશિરઃ –
પાર્શ્વોર્ધ્વભાગચલિતમુત્ક્ષિપ્તં કથ્યતે શિરઃ ।
વિનિયોગઃ –
ગૃહાણાગચ્છેત્યાદ્યર્થસૂચને પરિપોષણે ॥ ૬૩॥

અઙ્ગીકારે પ્રયોક્તવ્યમુત્ક્ષિપ્તં નામ શીર્ષકમ્ ।
પરિવાહિતશિરઃ –
પાર્શ્વયોશ્ચામરમિવ તતં ચેત્ પરિવાહિતમ્ ॥ ૬૪॥

વિનિયોગઃ –
મોહે ચ વિરહે સ્તોત્રે સન્તોષે ચાનુમોદને ।
વિચારે ચ પ્રયોક્તવ્યં પરિવાહિતશીર્ષકમ્ ॥ ૬૫॥

દૃષ્ટિભેદાઃ –
સમમાલોકિતં સાચીર્લોકિતનિમીલિતે ।
ઉલ્લોકિતાનુવૃત્તે ચ તથા ચૈવાવલોકિતમ્ ॥ ૬૬॥

ઇત્યષ્ટૌ દૃષ્ટિભેદાઃ સ્યુઃ કીર્તિતાઃ પૂર્વસૂરિભિઃ ।
સમદૃષ્ટિઃ –
વીક્ષણં સુરનારીવત્ સાનન્દં સમવીક્ષણમ્ ॥ ૬૭॥

વિનિયોગઃ –
નાટ્યારમ્ભે તુલાયાં ચાપ્યન્યચિન્તાવિનિશ્ચયે ।
આશ્ચર્યે દેવતારૂપે સમદૃષ્ટિરુદાહૃતા ॥ ૬૮॥

આલોકિતદૃષ્ટિઃ –

આલોકિતં ભવેદાશુભ્રમણં સ્ફુટવીક્ષણમ્ ।
વિનિયોગઃ –
કુલાલચક્રભ્રમણે સર્વવસ્તુપ્રદર્શને ॥ ૬૯॥

યાઞ્ચયાં ચ પ્રયોક્તવ્યમાલોકિતનિરીક્ષણમ્ ।
સાચીદૃષ્ટિઃ –
સ્વસ્થાને તિર્યગાકારમપાઙ્ગવલનં ક્રમાત્ ॥ ૭૦॥

સાચીદૃષ્ટિરિતિ જ્ઞેયા નાટ્યશાસ્ત્રવિશારદૈઃ ।
વિનિયોગઃ –
ઇઙ્ગિતે શ્મશ્રુસંસ્પર્શે શરલક્ષ્યે શુકે સ્મૃતૌ ॥ ૭૧॥

સૂચનાયાં ચ કાર્યાણાં નાટ્યે સાચીનિરીક્ષણમ્ ।
પ્રલોકિતદૃષ્ટિઃ –
પ્રલોકિતં પરિજ્ઞેયં ચલનં પાર્શ્વભાગયોઃ ॥ ૭૨॥

વિનિયોગઃ –
ઉભયોઃ પાર્શ્વયોર્વસ્તુ નિર્દેશે ચ પ્રસઞ્જિતે ।
ચલને બુદ્ધિજડ્યે ચ પ્રલોકિતનિરીક્ષણમ્ ॥ ૭૩॥

મોલિતદૃષ્ટિઃ –
દૃષ્ટે રર્ધવિકાશેન મીલિતા દૃષ્ટિરીરિતા ।
વિનિયોગઃ –
આશીવિષે પારવશ્યે જપે ધ્યાને નમસ્કૃતૌ ॥ ૭૪॥

ઉન્માદે સૂક્ષ્મદૃષ્ટૌ ચ મીલિતા દૃષ્ટિરીરિતા ।
ઉલ્લોકિતદૃષ્ટિઃ –
ઉલ્લોકિતમિતિ જ્ઞેયમૂર્ધ્વભાગે વિલોકનમ્ ॥ ૭૫॥

વિનિયોગઃ –
ધ્વજાગ્રે ગોપુરે દેવમણ્ડલે પૂર્વજન્મનિ ।
ઔન્નત્યે ચન્દ્રિકાદાવપ્યુલ્લોકિતનિરીક્ષણમ્ ॥ ૭૬॥

અનુવૃત્તદૃષ્ટિઃ –
ઊર્ધ્વાધો વીક્ષણં વેગાદનુવૃત્તમિતીરિતમ્ ।
વિનિયોગઃ –
કોપદૃષ્ટૌ પ્રિયામન્ત્રે અનુવૃત્તનિરીક્ષણમ્ ॥ ૭૭॥

અવલોકિતદૃષ્ટિઃ –
અધસ્તાદ્દર્શનં યત્તદવલોકિતમુચ્યતે ।
વિનિયોગઃ –
છાયાલોકે વિચારે ચ ચર્યાયાં પઠનશ્રમે ॥ ૭૮॥

સ્વાઙ્ગાવલોકને યાનેઽપ્યવલોકિતમુચ્યતે ।
ગ્રીવાભેદાઃ –
સુન્દરી ચ તિરશ્ચીના તથૈવ પરિવર્તિતા ॥ ૭૯॥

પ્રકમ્પિતા ચ ભાવજ્ઞૈર્જ્ઞેયા ગ્રીવા ચતુર્વિધા ।
સુન્દરી પ્રીવા –
તિર્યક્ ચઞ્ચલિતા ગ્રીવા સુન્દરીતિ નિગદ્યતે ॥ ૮૦॥

વિનિયોગઃ –
સ્નેહારમ્ભે તથા યત્ને સમ્યગર્થે ચ વિસ્તૃતે ।
સરસત્વાનુમોદે ચ સા ગ્રીવા સુન્દરી મતા ॥ ૮૧॥

તિરશ્ચીના ગ્રીવા –
પાર્શ્વયોરુર્ધ્વભાગે તુ ચલિતા સર્પયાનવત્ ।
સા ગ્રીવા તુ તિરશ્ચીનેત્યુચ્યતે નાટ્યકોવિદૈઃ ॥ ૮૨॥

વિનિયોગઃ –
સ્વડ્ગશ્રમે સર્પગત્યાં તિરશ્ચીના પ્રયુજ્યતે ।
પરિવર્તિતા ગ્રીવા –
સવ્યાપસવ્યચલિતા ગ્રીવા યત્રાર્ધચન્દ્રવત્ ॥ ૮૩॥

સા હિ નાટ્યકલાભિજ્ઞૈર્વિજ્ઞેયા પરિવર્તિતા ।
વિનિયોગઃ –
શૃઙ્ગારનટને કાન્તકપોલદ્વયચુમ્બને ॥ ૮૪॥

નાટ્યતન્ત્રવિચારજ્ઞૈઃ પ્રયોજ્યા પરિવર્તિતા ।
પ્રકમ્પિતા ગ્રીવા –
પુરઃ પશ્ચાત્ પ્રચલનાત્ કપોતીકણ્ઠકમ્પવત્ ॥ ૮૫॥

પ્રકમ્પિતેતિ સા ગ્રીવા નાટ્યશાસ્ત્રે પ્રશસ્યતે ।
વિનિયોગઃ –
યુષ્મદસ્મદિતિ પ્રોક્તે દેશીનાટ્યે વિશેષતઃ ॥ ૮૬॥

દોલાયાં મણિતે ચૈવ પ્રયોક્તવ્યા પ્રકમ્પિતા ।
હસ્તભેદાઃ –
અથેદાનીન્તુ હસ્તાનાં લક્ષણં પ્રોચ્યતે મયા ॥ ૮૭॥

અસંયુતાઃ સંયુતાશ્ચ હસ્તદ્વેધા નિરૂપિતા ।
તત્રાસંયુતહસ્તાનામાદૌ લક્ષણમુચ્યતે ॥ ૮૮॥

અસંયુતહસ્તાઃ –
પતાકસ્ત્રિપતાકોઽર્ધપતાકઃ કર્તરીમુખઃ ।
મયૂરાખ્યોઽર્ધચન્દ્રશ્ચ અરાલઃ શુકતુણ્ડકઃ ॥ ૮૯॥

મુષ્ટિશ્ચ શિખરાખ્યશ્ચ કપિત્થઃ કટકામુખઃ ।
સૂચી ચન્દ્રકલા પદ્મકોશઃ સર્પશિરસ્તથા ॥ ૯૦॥

મૃગશીર્ષઃ સિંહમુખઃ કાઙ્ગુલશ્ચાલપદ્મકઃ ।
ચતુરો ભ્રમરશ્ચૈવ હંસાસ્યો હંસપક્ષકઃ ॥ ૯૧॥

શન્દંશો મુકુલશ્ચેવ તામ્રચૂડસ્ત્રિશૂલકઃ ।
ઇત્યસંયુતહસ્તાનામષ્ટાવિંશતિરીરિતા ॥ ૯૨॥

પતાકહસ્તઃ –
અઙ્ગુલ્યઃ કુઞ્ચિતાઙ્ગુષ્ટઃ સંશ્લિષ્ટાઃ પ્રસૃતા યદિ ।
સ પતાકકરઃ પ્રોક્તો નૃત્યકર્મવિશારદૈઃ ॥ ૯૩॥

વિનિયોગઃ –
નાટ્યારમ્ભે વારિવાહે વને વસ્તુનિષેધને ।
કુચસ્થલે નિશાયાં ચ નદ્યામમરમણ્ડલે ॥ ૯૪॥

તુરઙ્ગે ખણ્ડને વાયૌ શયને ગમનોદ્યમે ।
પ્રતાપે ચ પ્રસાદે ચ ચન્દ્રિકાયાં ઘનાતપે ॥ ૯૫॥

કવાટપાટને સપ્તવિભક્ત્યર્થે તરઙ્ગકે ।
વીથિપ્રવેશભાવેઽપિ સમત્વે ચાઙ્ગરાગકે ॥ ૯૬॥

આત્માર્થે શપથે ચાપિ તૂષ્ણીમ્ભાવનિદર્શને ।
તાલપત્રે ચ ખેટે ચ દ્રવ્યાદિસ્પર્શને તથા ॥ ૯૭॥

આશીર્વાદક્રિયાયાં ચ નૃપશ્રેષ્ઠસ્ય ભાવને ।
તત્ર તત્રેતિ વચને સિન્ધૌ ચ સુકૃતિક્રમે ॥ ૯૮॥

સમ્બોધને પુરોગેઽપિ ખડ્ગરૂપસ્ય ધારણે ।
માસે સંવત્સરે વર્ષદિને સમ્માર્જને તથા ॥ ૯૯॥

એવમર્થેષુ યુજ્યન્તે પતાકહસ્તભાવનાઃ ।
ત્રિપતાકહસ્તઃ –
સ એવ ત્રિપતાકઃ સ્યાદ્વક્રિતાનામિકાઙ્ગુલિઃ ॥ ૧૦૦॥

વિનિયોગઃ –
મકુટે વૃક્ષભાવેષુ વજ્રે તદ્ધરવાસવે ।
કેતકીકુસુમે દીપે વહ્નિજ્વાલા વિજૃમ્ભને ॥ ૧૦૧॥

કપોતે પત્રલેખાયાં બાણાર્થે પરિવર્તને ।
યુજ્યતે ત્રિપતાકોઽયં કથિતો ભરતોત્તમૈઃ ॥ ૧૦૨॥

અર્ધપતાકહસ્તઃ –
ત્રિપતાકે કનિષ્ટા ચેદ્ વક્રિતાઽર્ધપતાકિકા ।
વિનિયોગઃ –
પલ્લવે ફલકે તીરે ઉભયોરિતિ વાચકે ॥ ૧૦૩॥

ક્રકચે છુરિકાયાં ચ ધ્વજે ગોપુરશ‌ૃઙ્ગયોઃ ।
યુજ્યતેઽર્ધપતાકોઽયં તત્તત્કર્મપ્રયોગકે ॥ ૧૦૪॥

કત્તરીમુખહસ્તઃ –
અસ્યૈવ ચાપિ હસ્તસ્ય તર્જની ચ કનિષ્ઠિકા ।
બહિઃ પ્રસારિતે દ્વે ચ સ કરઃ કર્તરીમુખઃ ॥ ૧૦૫॥

વિનિયોગઃ –
સ્ત્રીપુંસયોસ્તુ વિશ્લેષે વિપર્યાસપદેઽપિ વા ।
લુણ્ઠને નયનાન્તે ચ મરણે ભેદભાવને ॥ ૧૦૬॥

વિદ્યુદર્થેઽપ્યેકશય્યાવિરહે પતને તથા ।
લતાયાં યુજ્યતે યસ્તુ સ કરઃ કર્તરીમુખઃ ॥ ૧૦૭॥

મયૂરહસ્તઃ –
અસ્મિન્નામિકાઙ્ગુષ્ઠૌ શ્લિષ્ટૌ ચાન્યાઃ પ્રસારિતાઃ ।
મયૂરહસ્તઃ કથિતઃ કરટીકાવિચક્ષણૈઃ ॥ ૧૦૮॥

વિનિયોગઃ –
મયૂરાસ્યે લતાયાં ચ શકુને વમને તથા ।

અલકસ્યાપનયને લલાટતિલકેષુ ચ ॥ ૧૦૯॥

નદ્યુદકસ્ય નિક્ષેપે શાસ્ત્રવાદે પ્રસિદ્ધકે ।
એવમર્થેષુ યુજ્યન્તે મયૂરકરભાવનાઃ ॥ ૧૧૦॥

અર્ધચન્દ્રહસ્તઃ –
અર્ધચન્દ્રકરઃ સોઽયં પતાકેઽઙ્ગુષ્ઠસારણાત્ ।
વિનિયોગઃ –
ચન્દ્રે કૃષ્ણાષ્ટમીભાજિ ગલહસ્તાર્થકેઽપિ ચ ॥ ૧૧૧॥

ભલ્લાયુધે દેવતાનામભિષેચનકર્મણિ ।
ભુક્પાત્રે ચોદ્ભવે કટ્યાં ચિન્તાયામાત્મવાચકે ॥ ૧૧૨॥

ધ્યાને ચ પ્રાર્થને ચાપિ અઙ્ગાનાં સ્પર્શને તથા ।
પ્રાકૃતાનાં નમસ્કારે અર્ધચન્દ્રો નિયુજ્યતે ॥ ૧૧૩॥

અરાલહસ્તઃ –
પતાકે તર્જની વક્રા નામ્ના સોઽયમરાલકઃ ।
વિનિયોગઃ –
વિષાદ્યમૃતપાનેષુ પ્રચણ્ડપવનેઽપિ ચ ॥ ૧૧૪॥

શુકતુણ્ડહસ્તઃ –
અસ્મિન્નનામિકા વક્રા શુકતુણ્ડકરો ભવેત્ ।
વિનિયોગઃ –
બાણપ્રયોગે કુન્તાર્થે વાઽઽલયસ્ય સ્મૃતિક્રમે ॥ ૧૧૫॥

મર્મોત્યામુગ્રભાવેષુ શુકતુણ્ડો નિયુજ્યતે ।
મુષ્ટિહસ્તઃ –
મેલનાદઙ્ગુલીનાઞ્ચ કુઞ્ચિતાનાં તલાન્તરે ॥ ૧૧૬॥

અઙ્ગુષ્ઠશ્ચોપરિયુતો મુષ્ટિહસ્તોઽયમીર્યતે ।
વિનિયોગઃ –
સ્થિરે કચગ્રહે દાર્ઢ્યે વસ્ત્વાદીનાં ચ ધારણે ॥ ૧૧૭॥

મલ્લાનાં યુદ્ધભાવેઽપિ મુષ્ટિહસ્તોઽયમિષ્યતે ।
શિખરહસ્તઃ –
ચેન્મુષ્ટિરુન્નતાઙ્ગુષ્ઠઃ સ એવ શિખરઃ કરઃ ॥ ૧૧૮॥

વિનિયોગઃ –

મદને કાર્મુકે સ્તમ્ભે નિશ્ચયે પિતૃકર્મણિ ।
ઓષ્ઠેપ્રવિષ્ટરૂપે ચ રદને પ્રશ્નભાવને ॥ ૧૧૯॥

લિઙ્ગે નાસ્તીતિ વચને સ્મરણેઽભિનયાન્તિકે ।
કટિબન્ધાકર્ષણે ચ પરિરમ્ભવિધિક્રમે ॥ ૧૨૦॥

ઘણ્ટાનિનાદે શિખરો યુજ્યતે ભરતાદિભિઃ ।
કપિત્થહસ્તઃ –
અઙ્ગુષ્ઠમૂર્ધ્નિશિખરો વક્રિતા યદિ તર્જની ॥ ૧૨૧॥

કપિત્થાખ્યઃ કરઃ સોઽયં કીર્તિતો નૃત્તકોવિદૈઃ ।
વિનિયોગઃ –
લક્ષ્મ્યાં ચૈવ સરસ્વત્યાં નટાનાં તાલધારણે ॥ ૧૨૨॥

ગોદોહનેઽપ્યઞ્જને ચ લીલાકુસુમધારણે ।
ચેલાઞ્ચલાદિગ્રહણે પટસ્યૈવાવગુણ્ઠને ॥ ૧૨૩॥

ધૂપદીપાર્ચને ચાપિ કપિત્થઃ સમ્પ્રયુજ્યતે ।
કટકામુખહસ્તઃ –
કપિત્થે તર્જની ચોર્ધ્વમુચ્છ્રિતાઙ્ગુષ્ઠમધ્યમા ॥ ૧૨૪॥

કટકામુખહસ્તોઽયં કીર્તિતો ભરતાગમૈઃ ।
વિનિયોગઃ –
કુસુમાવચયે મુક્તાસ્રગ્દામ્નાં ધારણે તથા ॥ ૧૨૫॥

શરમધ્યાકર્ષણે ચ નાગલ્લીપ્રદાનકે ।
કસ્તૂરિકાદિવસ્તૂનાં પેષણે ગન્ધવાસને ॥ ૧૨૬॥

વચને દૃષ્ટિભાવેઽપિ કટકામુખ ઇષ્યતે ।
સૂચીહસ્તઃ –
ઊર્ધ્વપ્રસારિતા યત્ર કટકામુખતર્જની ॥ ૧૨૭॥

સૂચીહસ્તઃ સ વિજ્ઞેયો ભરતાગમકોવિદૈઃ ।
વિનિયોગઃ –
એકાર્થેઽપિ પરબ્રહ્મભાવનાયાં શતેઽપિ ચ ॥ ૧૨૮॥

રવૌ નગર્યાં લોકાર્થે તથેતિ વચનેઽપિ ચ ।
યચ્છબ્દેઽપિ તચ્છબ્દ્ વિજનાર્થેઽપિ તર્જને ॥ ૧૨૯॥

કાર્શ્યે શલાકે વપુષિ આશ્ચર્યે વેણિભાવને ।
છત્રે સમર્થે પાણૌ ચ રોમાલ્યાં ભેરીવાદને ॥ ૧૩૦॥

કુલાલચક્રભ્રમણે રથાઙ્ગમણ્ડલે તથા ।
વિવેચને દિનાન્તે ચ સૂચીહસ્તઃ પ્રકીર્તિતઃ ॥ ૧૩૧॥

ચન્દ્રકલાહસ્તઃ –
સૂચ્યામઙ્ગુષ્ઠમોક્ષે તુ કરશ્ચન્દ્રકલા ભવેત્ ।
વિનિયોગઃ –
ચન્દ્રે મુખે ચ પ્રાદેશે તન્માત્રાકારવસ્તુનિ ॥ ૧૩૨॥

શિવસ્ય મુકુટે ગઙ્ગાનદ્યાં ચ લગુડેઽપિ ચ ।
એષાં ચન્દ્રકલા ચૈવ વિનિયોજ્યા વિધીયતે ॥ ૧૩૩॥

પદ્મકોશહસ્તઃ –
અઙ્ગુલ્યો વિરલા કિઞ્ચિત્ કુઞ્ચિતાસ્તલનિમ્નગાઃ ।
પદ્મકોશાભિધો હસ્તસ્તન્નિરૂપણમુચ્યતે ॥ ૧૩૪॥

વિનિયોગઃ –
ફલે બિલ્વકપિત્થાદૌ સ્ત્રીણાં ચ કુચકુમ્ભયોઃ ।
આવર્તે કન્દુકે સ્થાલ્યાં ભોજને પુષ્પકોરકે ॥ ૧૩૫॥

સહકારફલે પુષ્પવર્ષે મઞ્જરિકાદિષુ ।
જપાકુસુમભાવે ચ ઘણ્ટારૂપે વિધાનકે ॥ ૧૩૬॥

વલ્મીકે કમલેઽપ્યણ્ડે પદ્મકોશો વિધીયતે ।
સર્પશીર્ષહસ્તઃ –
પતાકા નમિતાગ્રા ચેત્ સર્પશીર્ષકરો ભવેત્ ॥ ૧૩૭॥

વિનિયોગઃ –
ચન્દને ભુજગે મન્દ્રે પ્રોક્ષણે પોષણાદિષુ ।
દેવસ્યોદકદાનેષુ આસ્ફાલે ગજકુમ્ભયોઃ ॥ ૧૩૮॥

ભુજસ્થાને મલ્લાનાં તુ યુજ્યતે સર્પશીર્ષકઃ ।
મૃગશીર્ષહસ્તઃ –
અસ્મિન્ કનિષ્ઠિકાઙ્ગુષ્ઠે પ્રસૃતે મૃગશીર્ષકઃ ॥ ૧૩૯॥

વિનિયોગઃ –
સ્ત્રીણામર્થે કપોલે ચ ચક્રમર્યાદયોરપિ ।

ભીત્યાં વિવાદે નેપથ્યે આહ્વાને ચ ત્રિપુણ્ડ્રકે ॥ ૧૪૦॥

મૃગમુખે રઙ્ગમલ્લ્યાં પાદસંવાહને તથા ।
સર્વસ્વે મિલને કામમન્દિરે છત્રધારણે ॥ ૧૪૧॥

સઞ્ચારે ચ પ્રિયાહ્વાને યુજ્યતે મૃગશીર્ષકઃ ।
સિંહમુખહસ્તઃ –
મધ્યમાનામિકાગ્રાભ્યામઙ્ગુષ્ઠો મિશ્રિતો યદિ ॥ ૧૪૨॥

શેષૌ પ્રસારિતૌ યત્ર સ સિંહાસ્યકરો ભવેત્ ।
વિનિયોગઃ –
હોમે શશે ગજે દર્ભચલને પદ્મદામનિ ॥ ૧૪૩॥

સિંહાનને વૈદ્યપાકે શોધને સમ્પ્રયુજ્યતે ।
કાઙ્ગુલહસ્તઃ –
પદ્મકોશેઽનામિકા ચેન્નમ્રા કાઙ્ગુલહસ્તકઃ ॥ ૧૪૪॥

ધુતશિરઃ –
લકુચસ્ય ફલે બાલકિઙ્કિણ્યાં ઘણ્ટિકાર્થકે ।
ચકોરે ક્રમુકે બાલકુચે કહ્લારકે તથા ॥ ૧૪૫॥

ચાતકે નાલિકેરે ચ કાઙ્ગુલો યુજ્યતે કરઃ ।
અલપદ્મહસ્તઃ –
કનિષ્ઠાદ્યા વક્રિતાશ્ચ વિરલાશ્ચાલપદ્મકઃ ॥ ૧૪૬॥

વિનિયોગઃ –
વિકચાબ્જે કપિત્થાદિફલે ચાવર્તકે કુચે ।
વિરહે મુકુરે પૂર્ણચન્દ્રે સૌન્દર્યભાવને ॥ ૧૪૭॥

ધમ્મિલ્લે ચન્દ્રશાલાયાં ગ્રામે ચોદ્ધૃતકોપયોઃ ।
તટાકે શકટે ચક્રવાકે કલકલારવે ॥ ૧૪૮॥

શ્લાઘને સોઽલપદ્મશ્ચ કીર્તિતો ભરતાગમે ।
ચતુરહસ્તઃ –
તર્જન્યાદ્યાસ્તત્ર શ્લિષ્ટાઃ કનિષ્ઠા પ્રસૃતા યદિ ॥ ૧૪૯॥

અઙ્ગુષ્ઠોઽનામિકામૂલે તિર્યક્ ચેચ્ચતુરઃ કરઃ ।
વિનિયોગઃ –
કસ્તૂર્યાં કિઞ્ચિદર્થે ચ સ્વર્ણે તામ્રે ચ લોહકે ॥ ૧૫૦॥

આર્દ્રે ખેદે રસાસ્વાદે લોચને વર્ણભેદને ।
પ્રમાણે સરસે મન્દગમને શકલીકૃતે ॥ ૧૫૧॥

આનને ઘૃતતૈલાદૌ યુજ્યતે ચતુરઃ કરઃ ।
ભ્રમરહસ્તઃ –
મધ્યમાઙ્ગુષ્ઠસંયોગે તર્જની વક્રિતાકૃતિઃ ॥ ૧૫૨॥

શેષાઃ પ્રસારિતાશ્ચાસૌ ભ્રમરાભિધહસ્તકઃ ।
વિનિયોગઃ –
ભ્રમરે ચ શુકે પક્ષે સારસે કોકિલાદિષુ ॥ ૧૫૩॥

ભ્રમરાખ્યશ્ચ હસ્તોઽયં કીર્તિતો ભરતાગમે ।
હંસાસ્યહસ્તઃ –
ભધ્યમાદ્યાસ્ત્રયોઙ્ગુલ્યઃ પ્રસૃતા વિરલા યદિ ॥ ૧૫૪॥

તર્જન્યઙ્ગુષ્ઠસંશ્લેષાત્ કરો હંસાત્યકો ભવેત્ ।
વિનિયોગઃ –
માઙ્ગલ્યે સૂત્રબન્ધે ચ ઉપદેશવિનિશ્ચયે ॥ ૧૫૫॥

રોમાઞ્ચે મૌક્તિકાદૌ ચ દીપવર્તિપ્રસારણે ।
નિકષે મલ્લિકાદૌ ચ ચિત્રે તલ્લે ખને તથા ॥ ૧૫૬॥

દંશે ચ જલબન્ધે ચ હંસાસ્યો યુજ્યતે કરઃ ।
હંસપક્ષહસ્તઃ –
સર્પશીર્ષકરે સમ્યક્ કનિષ્ઠા પ્રસૃતા યદિ ॥ ૧૫૭॥

હંસપક્ષઃ કરઃ સોઽય તન્નિરૂપણમુચ્યતે ।
વિનિયોગઃ –
ષટ્સઙ્ખ્યાયાં સેતુબન્ધે નખરેખાઙ્કણે તથા ॥ ૧૫૮॥

પિધાને હંસપક્ષોઽયં કથિતો ભરતાગમે ।
સન્દંશસ્તઃ –
પુનઃ પુનઃ પદ્મકોશઃ સંશ્લિષ્ટો વિરલો યદિ ॥ ૧૫૯॥

સન્દંશાભિધહસ્તોઽયં કીર્તિતો નૃત્યકોવિદૈઃ ।
વિનિયોગઃ –
ઉદરે વલિદાને ચ વ્રણે કીટે મહાભયે ॥ ૧૬૦॥

અર્ચને પઞ્ચસઙ્ખ્યાયાં સન્દંશાખ્યો નિયુજ્યતે ।
મુકુલહસ્તઃ –
અઙ્ગુલોપઞ્ચકં ચૈવ મેલયિત્વા પ્રદર્શને ॥ ૧૬૧॥

મુકુલાભિધહસ્તોઽયં કીર્ત્યતે ભરતાગમે ।
કુમુદે ભોજને પઞ્ચબાણે મુદ્રાદિધારણે ॥ ૧૬૨॥

નાભૌ ચ કદલીપુષ્પે યુજ્યતે મુકુલઃ કરઃ ।
તામ્રચૂડહસ્તઃ –
મુકુલે તામ્રચૂડઃ સ્યાત્તર્જની વક્રિતા યદિ ॥ ૧૬૩॥

વિનિયોગઃ –
કુક્કુટાદૌ વકે કાકે ઉષ્ટ્રે વત્સે ચ લેખને ।
યુજ્યતે તામ્રચૂડાખ્યઃ કરો ભરતવેદિભિઃ ॥ ૧૬૪॥

ત્રિશૂલહસ્તઃ –
નિકુઞ્ચનયુતાઙ્ગુષ્ઠકનિષ્ઠસ્તુ ત્રિશૂલકઃ ।
વિનિયોગઃ –
વિલ્વપત્રે ત્રિત્વયુક્તે ત્રિશૂલકર ઈરિતઃ ॥ ૧૬૫॥

વ્યાઘ્રહસ્તઃ –
કનિષ્ઠાઙ્ગુષ્ઠનમને મૃગશીર્ષકરે તથા ।
વ્યાઘ્રહસ્તઃ સ વિજ્ઞેયો ભરતાગમકોવિદૈઃ ॥ ૧૬૬॥

વિનિયોગઃ –
વ્યાઘ્રે ભેકે મર્કટે ચ શુક્તૌ સંયુજ્યતે કરઃ ।
અર્ધસૂચીહસ્તઃ –
કપિત્થે તર્જની ઊર્ધ્વસારણે ત્વર્ધસૂચિકઃ ॥ ૧૬૭॥

વિનિયોગઃ –
અઙ્કુરે પક્ષિશાવાદૌ બૃહત્કીટે નિયુજ્યતે ।
કટકહસ્તઃ –
સન્દંશેઽપ્યુર્ધ્વભાગે તુ મધ્યમાનામિકાન્વયા ॥ ૧૬૮॥

.. ..      .. .. કટકો હસ્ત ઉચ્યતે ।
વિનિયોગઃ –
એતસ્ય વિનિયોગસ્તુ .. ..   .. ..  દર્શને ॥ ૧૬૯॥

આહ્વાનભાવચલને .. .. .. .. ।
પલ્લિહસ્તઃ –
મયૂરે તર્જનીપૃષ્ઠો મધ્યમેન યુતો યદિ ॥ ૧૭૦॥

પલ્લિહસ્તઃ સ વિજ્ઞેયઃ પલ્લાર્થૈ વિનિયુજ્યતે ।
અભિનયવશાદેષાં સંયુતત્વં પ્રકીર્તિતમ્ ॥ ૧૭૧॥

માર્ગપ્રદર્શનં તેષાં ક્રમાલ્લક્ષ્યાનુસારતઃ ।
સંયુતહસ્તાઃ –
અઞ્જલિશ્ચ કપોતશ્ચ કર્કટઃ સ્વસ્તિકસ્તથા ॥ ૧૭૨॥

ડોલાહસ્તઃ પુષ્પપુટ ઉત્સઙ્ગઃ શિવલિઙ્ગકઃ ।
કટકાવર્ધનશ્ચૈવ કર્તરીસ્વસ્તિકસ્તથા ॥ ૧૭૩॥

શકટં શઙ્ખચક્રે ચ સમ્પુટઃ પાશકીલકૌ ।
મત્સ્યઃ કૂર્મો વરાહશ્ચ ગરુડો નાગબન્ધકઃ ॥ ૧૭૪॥

ખટ્વા ભેરુણ્ડ ઇત્યેતે સઙ્ખ્યાતા સંયુતાઃ કરાઃ ।
ત્રયોવિંશતિરિત્યુક્તાઃ પૂર્વગૈર્ભરતાદિભિઃ ॥ ૧૭૫॥

અઞ્જલિહસ્તઃ –
પતાકાતલયોર્યોગાદઞ્જલિઃ કર ઈરિતઃ ।
વિનિયોગઃ –
દેવતાગુરુવિપ્રાણાં નમસ્કારેષ્વનુક્રમાત્ ॥ ૧૭૬॥

કાર્યઃ શિરોમુખોરસ્થો વિનિયોગેઽઞ્જલિબુધૈઃ ।
કપોતહસ્તઃ –
કપોતોઽસૌ કરો યત્ર શ્લિષ્ટાઽઽમૂલાગ્રપાર્શ્વકઃ ॥ ૧૭૭॥

વિનિયોગઃ –
પ્રણામે ગુરુસમ્ભાષે વિનયાઙ્ગીકૃતેષ્વયમ્ ।
કર્કટહસ્તઃ –
અન્યોન્યસ્યાન્તરે યત્રાઙ્ગુલ્યો નિઃસૃત્ય હસ્તયોઃ ॥ ૧૭૮॥

અન્તર્બહિર્વા વર્તન્તે કર્કટઃ સોઽભિધીયતે ।
વિનિયોગઃ –
સમૂહાગમને તુન્દદર્શને શઙ્ખપૂરણે ॥ ૧૭૯॥

અઙ્ગાનાં મોટને શાખોન્નમને ચ નિયુજ્યતે ।

સ્વસ્તિકહસ્તઃ –
પતાકયોઃ સન્નિયુક્તઃ કરયોર્મણિબન્ધયોઃ ॥ ૧૮૦॥

સંયોગેન સ્વસ્તિકાખ્યો મકરે વિનિયુજ્યતે ।
ડોલાહસ્તઃ –
પતાક ઊરુદેશસ્થે ડોલાહસ્તોઽયમિષ્યતે ॥ ૧૮૧॥

વિનિયોગઃ –
નાટ્યારમ્ભે પ્રયોક્તવ્ય ઇતિ નાટ્યવિદો વિદુઃ ।
પુષ્પપુટહસ્તઃ –
સંશ્લિષ્ટકરયોઃ સર્પશીર્ષઃ પુષ્પપુટઃ કરઃ ॥ ૧૮૨॥

વિનિયોગઃ –
નીરાજનાવિધૌ વારિફલાદિગ્રહણેઽપિ ચ ।
સધ્યાર્ઘ્યમર્ઘ્યદાને ચ મન્ત્રપુષ્પે ચ યુજ્યતે ॥ ૧૮૩॥

ઉત્સઙ્ગહસ્તઃ –
આન્યોન્યબાહુદેશસ્થૌ મૃગશીર્ષકરૌ યદિ ।
ઉત્સઙ્ગહસ્તઃ સ જ્ઞેયો ભરતાગમવેદિભિઃ ॥ ૧૮૪॥

વિનિયોગઃ –
આલિઙ્ગને ચ લજ્જાયામઙ્ગદાદિપ્રદર્શને ।
બાલાનાં શિક્ષણે ચાયમુત્સઙ્ગો યુજ્યતે કરઃ ॥ ૧૮૫॥

શિવલિઙ્ગહસ્તઃ –
વામેઽર્ધચન્દ્રો વિન્યસ્તઃ શિખરઃ શિવલિઙ્ગકઃ ।
વિનિયોગઃ –
વિનિયોગસ્તુ તસ્યૈવ શિવલિઙ્ગસ્ય દર્શને ॥ ૧૮૬॥

કટકાવર્ધનહસ્તઃ –
કટકામુખયોઃ પાણ્યોઃ સ્વસ્તિકો મણિબન્ધયોઃ ।
કટકાવર્ધનાખ્યઃ સ્યાદિતિ નાટ્યવિદો વિદુઃ ॥ ૧૮૭॥

વિનિયોગઃ –
પટ્ટાભિષેકે પૂજાયાં વિવાહાદિષુ યુજ્યતે ।
કર્તરીસ્વસ્તિકહસ્તઃ –
કર્તરીસ્વસ્તિકાકારા કર્તરીસ્વસ્તિકો ભવેત્ ॥ ૧૮૮॥

વિનિયોગઃ –

શાખાસુ ચાદ્રિશિખરે વૃક્ષેષુ ચ નિયુજ્યતે ।

શકટહસ્તઃ –

ભ્રમરે મધ્યમાઙ્ગુષ્ઠપ્રસારાચ્છકટો ભવેત્ ॥ ૧૮૯॥

વિનિયોગઃ –

રાક્ષસાભિનયે પ્રાયઃ શકટો વિનિયુજ્યતે ।

શઙ્ખહસ્તઃ –

શિખરાન્તર્ગતાઙ્ગુષ્ઠ ઇતરાઙ્ગુષ્ઠસઙ્ગતઃ ॥ ૧૯૦॥

તર્જન્યા યુત અશ્લિષ્ટઃ શઙ્ખહસ્તઃ પ્રકીર્તિતઃ ।

વિનિયોગઃ –

શઙ્ખાદિષુ પ્રયોજ્યોઽયમિત્યાહુર્ભરતાદયઃ ॥ ૧૯૧॥

ચક્રહસ્તઃ –

યત્રાર્ધચન્દ્રૌ તિર્યઞ્ચાવન્યોન્યતલસંસ્પૃશૌ ।

ચક્રહસ્તઃ સ વિજ્ઞેયશ્ચક્રાર્થે વિનિયુજ્યતે ॥ ૧૯૨॥

સમ્પુટહસ્તઃ –

કુઞ્ચિતાઙ્ગુલયશ્ચક્રે પ્રોક્તઃ સમ્પુટહસ્તકઃ ।

વિનિયોગઃ –

વસ્ત્વાચ્છાદે સમ્પુટે ચ સમ્પુટઃ કર ઈરિતઃ ॥ ૧૯૩॥

પાશહસ્તઃ –

સૂચ્યાં નિકુઞ્ચિતે શ્લિષ્ટે તર્જન્યૌ પાશ ઈરિતઃ ।

વિનિયોગઃ –

અન્યોન્યકલહે પાશે શૃઙ્ખલાયાં નિયુજ્યતે ॥ ૧૯૪॥

કીલકહસ્તઃ –

કનિષ્ઠે કુઞ્ચિતે શ્લિષ્ટે મૃગશીર્ષસ્તુ કીલકઃ ।

વિનિયોગઃ –

સ્નેહે નર્માનુલાપે ચ કીલકો વિનિયુજ્યતે ॥ ૧૯૫॥

મત્સ્યહસ્તઃ –

કરપૃષ્ઠોપરિ ન્યસ્તો યત્ર હસ્તસ્ત્વધોમુખઃ ।

કિઞ્ચિત્પ્રસારિતાઙ્ગુષ્ઠકનિષ્ઠો મત્સ્યનામકઃ ॥ ૧૯૬॥

વિનિયોગઃ –
એતસ્ય વિનિયોગસ્તુ સમ્મતો મત્સ્યદર્શને ।
કૂર્મહસ્તઃ –
કુઞ્ચિતાગ્રાઙ્ગુલિશ્ચક્રે ત્યક્તાઙ્ગુષ્ઠકનિષ્ઠકઃ ॥ ૧૯૭॥

કૂર્મહસ્તઃ સ વિજ્ઞેયઃ કૂર્માર્થે વિનિયુજ્યતે ।
વરાહહસ્તઃ –
મૃગશીર્ષે ત્વન્યતરે સ્વોપર્યેકઃ સ્થિતે યદિ ॥ ૧૯૮॥

કનિષ્ઠાઙ્ગુષ્ઠયોર્યોગાદ્વરાહકર ઈરિતઃ ।
વિનિયોગઃ –
એતસ્ય વિયોગઃ સ્યાદ્વરાહાર્થપ્રદર્શને ॥ ૧૯૯॥

ગરુડહસ્તઃ –
તિર્યક્તલસ્થિતાવર્ધચન્દ્રાવઙ્ગુષ્ઠયોગતઃ ।
ગરુડહસ્ત અસ્ત્ ઇત્યાહુર્ગરુડાર્થે નિયુજ્યતે ॥ ૨૦૦॥

નાગબન્ધહસ્તઃ –
સર્પશીર્ષસ્વસ્તિકઞ્ચ નાગબન્ધ ઇતીરિતઃ ।
વિનિયોગઃ –
એતસ્ય વિનિયોગસ્તુ નાગબન્ધે હિ સમ્મતઃ ॥ ૨૦૧॥

ખટ્વાહસ્તઃ –
ચતુરે ચતુરં ન્યસ્ય તર્જન્યઙ્ગુષ્ઠમોક્ષતઃ ।
ખટ્વાહસ્તો ભવેદેષ ખટ્વાશિવિકયોઃ સ્મૃતઃ ॥ ૨૦૨॥

ભેરુણ્ડહસ્તઃ –
મણિબન્ધે કપિત્થાભ્યાં ભેરુણ્ડકર ઇષ્યતે ।
વિનિયોગઃ –
ભેરુણ્ડે પક્ષિદમ્પત્યોર્ભેરુણ્ડો યુજ્યતે કરઃ ॥ ૨૦૩॥

દેવહસ્તાઃ –
અથાત્ર બ્રહ્મરુદ્રાદિદેવતાભિનયક્રમાત્ ।
મૂર્તિભેદેન યે હસ્તાસ્તેષાં લક્ષણમુચ્યતે ॥ ૨૦૪॥

બ્રહ્મહસ્તઃ –
બ્રહ્મણશ્ચતુરો વામે હંસાસ્યો દક્ષિણે કરઃ ।

ઈશ્વરહસ્તઃ –
શમ્ભોર્વામે મૃગશીર્ષસ્ત્રિપતાકસ્તુ દક્ષિણે ॥ ૨૦૫॥

વિષ્ણુહસ્તઃ –
હસ્તાભ્યાં ત્રિપતાકસ્તુ વિષ્ણુહસ્તઃ સ કીર્તિતઃ ।
સરસ્વતીહસ્તઃ –
સૂચીકૃતે દક્ષિણે ચ વામે ચાંસસમકૃતૌ ॥ ૨૦૬॥

કપિત્થકેઽપિ ભારત્યાઃ કર સ્યાદિતિ સમ્મતઃ ।
પાર્વતીહસ્તઃ –
ઊર્ધ્વાધઃ પ્રસૂતાવર્ધચન્દ્રાખ્યૌ વામદક્ષિણૌ ॥ ૨૦૭॥

અભયો વરદશ્ચૈવ પાર્વત્યા કર ઈરિતઃ ।
લક્ષ્મીહસ્તઃ –
અંસોપકણ્ઠે હસ્તાભ્યાં કપિત્થસ્તુ શ્રિયઃ કરઃ ॥ ૨૦૮॥

વિનાયકહસ્તઃ –
ઉરોગતાભ્યાં હસ્તાભ્યાં કપિત્થો વિઘ્નરાટ્ કરઃ ।
ષણ્મુખહસ્તઃ –
વામે કરે ત્રિશૂલઞ્ચ શિખરો દક્ષિણે કરે ॥ ૨૦૯॥

ઊર્ધ્વં ગતે ષણ્મુખસ્ય હસ્તઃ સ્યાદિતિ કીર્તિતઃ –
મન્મથહસ્તઃ –
વામે કરે તુ શિખરો દક્ષિણે કટકામુખઃ ॥ ૨૧૦॥

મન્મથસ્ય કરઃ પ્રોક્તો નાટ્યશાસ્ત્રાર્થકોવિદૈઃ ।
ઇન્દ્રહસ્તઃ –
ત્રિપતાકઃ સ્વસ્તિકશ્ચ શક્રહસ્તઃ પ્રકીર્તિતઃ ॥ ૨૧૧॥

અગ્નિહસ્તઃ –
ત્રિપતાકો દક્ષિણે તુ વામે કાઙ્ગુલહસ્તકઃ ।
અગ્નિહસ્તઃ સ વિજ્ઞેયો નાટ્યશાસ્ત્રવિશારદૈઃ ॥ ૨૧૨॥

યમહસ્તઃ –
વામે પાશં દક્ષિણે તુ સૂચી યમકરઃ સ્મૃતઃ ।
નિરૃતિહસ્તઃ –
ખટ્વા ચ શકટશ્ચૈવ કીર્તિતો નિરૃતેઃ કરઃ ॥ ૨૧૩॥

વરુણહસ્તઃ –

પતાકો દક્ષિણે વામે શિખરો વારુણઃ કરઃ ।

યુહસ્તઃ –

અરાલો દક્ષિણે હસ્તે વામે ચાર્ધપતાકિકા ॥ ૨૧૪॥

ધૃતા ચેદ્વાયુદેવસ્ય કર ઇત્યહ્ધીયતે ।

કુવેરહસ્તઃ –

વામે પદ્મં દક્ષિણે તુ ગદા યક્ષપતેઃ કરઃ ॥ ૨૧૫॥

દશાવતારાહસ્તાઃ –

મત્સ્યાવતારહસ્તઃ –

મત્સ્યહસ્તં દર્શયિત્વા તતઃ સ્કન્ધસમૌ કરૌ ।

ધૃતો મત્સ્યાવતારસ્ય હસ્ત ઇત્યભિધીયતે ॥ ૨૧૬॥

કૂર્માવતારહસ્તઃ –

કૂર્મહસ્તં દર્શયિત્વા તતઃ સ્કન્ધસમૌ કરૌ ।

ધૃતૌ કૂર્માવતારસ્ય હસ્ત ઇત્યભિધીયતે ॥ ૨૧૭॥

વરાહાવતારહસ્તઃ –

દર્શયિત્વા વરાહં તુ કટિપાર્શ્વસમૌ કરૌ ।

ધૃતા વરાહાવતારસ્ય દેવસ્ય કર ઇષ્યતે ॥ ૨૧૮॥

નૃસિહાવતારહસ્તઃ –

વામે સિંહમુખં ધૃત્વા દક્ષિણે ત્રિપતાકિકા ।

નરસિંહાવતારસ્ય હસ્ત ઇત્યુચ્યતે બુધૈઃ ॥ ૨૧૯॥

વામનાવતારહસ્તઃ –

ઊર્ધ્વાધો ધૃતમુષ્ટિભ્યાં સવ્યાન્યાભ્યાં યદિ સ્થિતઃ ।

સ વામનાવતારસ્ય હસ્ત ઇત્યભિધીયતે ॥ ૨૨૦॥

અરશુરામાવતારહસ્તઃ –

વામં કટિતટે ન્યસ્ય દક્ષિણેઽર્ધપતાધિકા ।

ધૃતા પરશુરામસ્ય હસ્ત ઇત્યભિધીયતે ॥ ૨૨૧॥

રામચન્દ્રાવતારહસ્તઃ –

કપિત્થો દક્ષિણે હસ્તે વામે તુ શિખરઃ કરઃ ।

ઊર્ધ્વં ધૃતો રામચન્દ્રહસ્ત ઇત્યુચ્યતે બુધૈઃ ॥ ૨૨૨॥

અલરામાવતારહસ્તઃ –
પતાકો દક્ષિણે હસ્તે મુષ્ટિર્વામકરે તથા ।
બલરામાવતારસ્ય હસ્ત ઇત્યુચ્યતે બુધૈઃ ॥ ૨૨૩ ॥

કૃષ્ણાવતારહસ્તઃ –
મૃગશીર્ષે તુ હસ્તાભ્યામન્યોન્યાભિમુખે કૃતે ।
આસ્યોપકણ્ઠે કૃષ્ણસ્ય હસ્ત ઇત્યુચ્યતે બુધૈઃ ॥ ૨૨૪ ॥

કલ્ક્યવતારહસ્તઃ –
પતાકો દક્ષિણે વામે ત્રિપતાકઃ કરો ધૃતઃ ।
કલ્ક્યાખ્યસ્યાવતારસ્ય હસ્ત ઇત્યભિધીયતે ॥ ૨૨૫ ॥

અથ તત્તજ્જાતીયહસ્તાઃ –

રાક્ષસહસ્તઃ –
મુખે કરાભ્યાં શકટૌ રાક્ષસાનાં કરઃ સ્મૃતઃ ।
બ્રાહ્મણહસ્તઃ –
કરાભ્યાં શિખરં ધૃત્વા યજ્ઞસૂત્રસ્ય સૂચને ॥ ૨૨૬ ॥

દક્ષિણેન કૃતે તિર્યગ્ બ્રાહ્મણાનાં કરઃ સ્મૃતઃ ।
ક્ષત્રિયહસ્તઃ –
વામેન શિખરં તિર્યગ્ ધૃત્વાન્યેન પતાકિકા ॥ ૨૨૭ ॥

ધૃતા યદિ ક્ષત્રિયાણાં હસ્ત ઇત્યભિધીયતે ।
વૈશ્યહસ્તઃ –
કરે વામે તુ હંસાસ્યો દક્ષિણે કટકામુખઃ ॥ ૨૨૮ ॥

વશ્યહસ્તોઽયમાખ્યાતો મુનિભિર્ભરતાદિભિઃ ।
શૂદ્રહસ્તઃ –
વામે તુ શિખરં ધૃત્વા દક્ષિણે મૃગશીર્ષકઃ ॥ ૨૨૯ ॥

શૂદ્રહસ્તઃ સ વિજ્ઞેયો મુનિભિર્ભરતાદિભિઃ ।
યદષ્ટાદશજાતીનાં કર્મ તેન કરાઃ સ્મૃતાઃ ॥ ૨૩૦ ॥

તત્તદ્દેશજાનામપિ એવમુહ્યં બુધોત્તમૈઃ ।
બાન્ધવહસ્તાઃ –
દમ્પતિહસ્તઃ –
વામે તુ શિખરં ધૃત્વા દક્ષિણે મૃગશીર્ષકઃ ॥ ૨૩૧ ॥

ધૃતઃ સ્ત્રીપુંસયોર્હસ્તઃ ખ્યાતો ભરતકોવિદૈઃ ।
માતૃહસ્તઃ –
વામે હસ્તેઽર્ધચન્દ્રશ્ચ સન્દંશો દક્ષિણે કરે ॥ ૨૩૨॥

આવર્તયિત્વા જઠરે વામહસ્તં તતઃ પરમ્ ।
સ્ત્રિયાઃ કરો ધૃતો માતૃહસ્ત ઇત્યુચ્યતે બુધૈઃ ॥ ૨૩૩॥

વિનિયોગઃ –
જનન્યાં ચ કુમાર્યાં ચ માતૃહસ્તો નિયુજ્યતે ।
પિતૃહસ્તઃ –
એતસ્મિન્ માતૃહસ્તે તુ શિખરે દક્ષિણેન તુ ॥ ૨૩૪॥

ધૃતે સતિ પિતૃહસ્ત ઇત્યાખ્યાતો મનીષિભિઃ ।
વિનિયોગઃ –
અયં હસ્તસ્તુ જનકે જામાતરિ ચ યુજ્યતે ॥ ૨૩૫॥

શ્વશ્રૂહસ્તઃ –
વિન્યસ્ય કણ્ઠે હંસાસ્યં સન્દંશં દક્ષિણે કરે ।
ઉદરે ચ પરામૃશ્ય વામહસ્તં તતઃ પરમ્ ॥ ૨૩૬॥

સ્ત્રિયાઃ કરો ધૃતઃ શ્વશ્રુહસ્તસ્તસ્યાં નિયુજ્યતે ।
શ્વશુરહસ્તઃ –
એતસ્યાન્તે તુ હસ્તસ્ય શિખરો દક્ષિણે યદિ ॥ ૨૩૭॥

ધૃતશ્ચ શ્વશુરસ્યાયં હસ્ત ઇત્યુચ્યતે બુધૈઃ ।
ભર્તૃભ્રાતૃહસ્તઃ –
વામે તુ શિખરં ધૃત્વા પાર્શ્વયોઃ કર્તરીમુખઃ ॥ ૨૩૮॥

ધૃતો દક્ષિણહસ્તેન ભર્તૃભ્રાતૃકરઃ સ્મૃતઃ ।
નનાન્દૃહસ્તઃ –
અન્તે ત્વેતસ્ય હસ્તસ્ય સ્ત્રીહસ્તો દક્ષિણે કરે ॥ ૨૩૯॥

ધૃતો નનાન્દૃહસ્તઃ સ્યાદિતિ નાટ્યવિદાં મતમ્ ।
જ્યેષ્ઠકનિષ્ઠભ્રાતૃહસ્તઃ –
મયૂરહસ્તઃ પુરતઃ પાર્શ્વભાગે ચ દર્શિતઃ ॥ ૨૪૦॥

જ્યેષ્ઠભ્રાતુઃ કનિષ્ઠસ્યાપ્યયં હસ્ત ઇતિ સ્મૃતઃ ।
પુત્રહસ્તઃ –

સન્દંશમુદ્રે ન્યસ્ય ભ્રામયિત્વા તતઃ પરમ્ ॥ ૨૪૧॥

ધૃતો વામેન શિખરં પુત્રહસ્તઃ પ્રકીર્તિતઃ ।
ન્ષાહસ્તઃ –
એતદન્તે દક્ષિણેન સ્ત્રીહસ્તશ્ચ ધૃતો યદિ ॥ ૨૪૨॥

સ્નુષાહસ્ત ઇતિ ખ્યાતો ભરતાગમકોવિદૈઃ ।
સપત્નીહસ્તઃ –
દર્શયિત્વા પાશહસ્તં કરાભ્યાં સ્ત્રીકરાવુભૌ ॥ ૨૪૩॥

ધૃતૌ સપત્નીહસ્તઃ સ્યાદિતિ ભાવવિદો વિદુઃ ।
નૃત્તહસ્તાનાં ગતયઃ –
ભવન્તિ નૃત્તહસ્તાનાં ગતયઃ પઞ્ચધા ભુવિ ॥ ૨૪૪॥

ઊર્ધ્વાઽધરોત્તરા પ્રાચી દક્ષિણા ચેતિ વિશ્રુતા ।
યથા સ્યાત્ પાદવિન્યાસ્તથૈવ કરયોરપિ ॥ ૨૪૫॥

વામાઙ્ગભાગે વામસ્ય દક્ષિણે દક્ષિણસ્ય ચ ।
કુર્યાત્ પ્રચલનં હ્યેતન્નૃત્તસિદ્ધાન્તલક્ષણમ્ ॥ ૨૪૬॥

યતો હસ્તસ્તતો દૃષ્ટિર્યતો દૃષ્ટિસ્તતો મનઃ ।
યતો મનસ્તતો ભાવો યતો ભાવસ્તતો રસઃ ॥ ૨૪૭॥

નૃત્તહસ્તઃ –
પતાકાસ્વસ્તિકાખ્યશ્ચ ડોલાહસ્તસ્તથાઞ્જલિઃ ।
કટકાવર્ધનશ્ચૈવ શકટઃ પાશકીલકૌ ॥ ૨૪૮॥

કપિત્થઃ શિખરઃ કૂર્મો હંસાસ્યશ્ચાલપદ્મકઃ ।
ત્રયોદશૈતે હસ્તાઃ સ્યુર્નૃત્તસ્યાપ્યુપયોગિનઃ ॥ ૨૪૯॥

નવગ્રહહસ્તાઃ –
સૂર્યહસ્તઃ –
અંસોપકણ્ઠે હસ્તાભ્યામલપદ્મકપિત્થકઃ ।
ધૃતો યદિ કરો હ્યેષ દિવાકરકરઃ સ્મૃતઃ ॥ ૨૫૦॥

ચન્દ્રહસ્તઃ –
અલપદ્મો વામહસ્તે દક્ષિણે ચ પતાતિકા ।
નિશાકરકરઃ પ્રોક્તો ભરતાગમદર્શિભિઃ ॥ ૨૫૧॥

કુજહસ્તઃ –
વામે કરે તુ સૂચી સ્યાન્મુષ્ટિહસ્તસ્તુ દક્ષિણે ।
ધૃતશ્ચેન્નાટ્યશાસ્ત્રજ્ઞૈરઙ્ગારકકરઃ સ્મૃતઃ ॥ ૨૫૨॥

બુધહસ્તઃ –
તિર્યગ્વામે ચ મુષ્ટિઃ સ્યાદ્દક્ષિણે ચ પતાકિકા ।
બુધગ્રહકરઃ પ્રોક્તો ભરતાગમવેદિભિઃ ॥ ૨૫૩॥

ગુરુહસ્તઃ –
હસ્તાભ્યાં શિખરં ધૃત્વા યજ્ઞસૂત્રસ્ય દર્શનમ્ ।
ઋષિબ્રાહ્મણહસ્તોઽયં ગુરોશ્ચાપિ પ્રકીર્તિતઃ ॥ ૨૫૪॥

શુક્રહસ્તઃ –
વામોચ્ચભાગે મુષ્ટિઃ સ્યાદધસ્તાદ્દક્ષિણે તથા ।
શુક્રગ્રહકરઃ પ્રોક્તો ભરતાગમવેદિભિઃ ॥ ૨૫૫॥

શનિહસ્તઃ –
વામે કરે તુ શિખરસ્ત્રિશૂલો દક્ષિણે કરે ।
શનૈશ્ચરકરઃ પ્રોક્તો ભરતાગમકોવિદૈઃ ॥ ૨૫૬॥

રાહુહસ્તઃ –
સર્પશીર્ષો વામકરે સૂચી સ્યાદ્દક્ષિણે કરે ।
રાહુગ્રહકરઃ પ્રોક્તો નાટ્યવિદ્યાધિપૈર્જનૈઃ ॥ ૨૫૭॥

કેતુહસ્તઃ –
વામે કરે તુ સૂચી સ્યાદ્દક્ષિણે તુ પતાકિકા ।
કેતુગ્રહકરઃ પ્રોક્તો ભરતાગમદર્શિભિઃ ॥ ૨૫૮॥

પાદભેદાઃ –
વક્ષ્યતે પાદભેદાનાં લક્ષણં પૂર્વસમ્મતમ્ ।
મણ્ડલોત્પ્લવને ચૈવ ભ્રમરી પાદચારિકા ॥ ૨૫૯॥

ચતુર્ધા પાદભેદાઃ સ્યુસ્તેષાં લક્ષણમુચ્યતે ।
મણ્ડલભેદાઃ –
સ્થાનકં ચાયતાલીઢં પ્રેઙ્ખણપ્રરિતાનિ ચ ॥ ૨૬૦॥

પ્રત્યાલીઢં ખસ્તિકં ચ મોટિતં સમસૂચિકા ।
પાર્શ્વસૂચીતિ ચ દશ મણ્ડલાનીરિતાનીહ ॥ ૨૬૧॥

સ્થાનકમણ્ડલં –
કટિં સ્પૃષ્ટ્વાऽર્ધચન્દ્રાખ્યપાણિભ્યાં સમપાદતઃ ।
સમરેખતયા તિષ્ઠેત્ તત્ સ્યાત્ સ્થાનકમણ્ડલમ્ ॥ ૨૬૨॥

આયતમણ્ડલં –
વિતસ્ત્યન્તરિતૌ પાદૌ કૃત્વા તુ ચતુરસ્રકૌ ।
તિર્યક્ કુઞ્ચિતજાનુભ્યાં સ્થિતિરાયતમણ્ડલમ્ ॥ ૨૬૩॥

આલીઢમણ્ડલં –
દક્ષિણાઙ્ઘ્રેશ્ચ પુરતઃ વિતસ્તિત્રિતયાન્તરમ્ ।
વિન્યસેદ્ વામપાદં ચ શિખરં વામપાણિના ॥ ૨૬૪॥

કટકામુખહસ્તશ્ચ દક્ષિણેન ધૃતો યદિ ।
આલીઢમણ્ડલમિતિ વિખ્યાતં ભરતાદિભિઃ ॥ ૨૬૫॥

પ્રત્યાલીઢમણ્ડલં –
આલીઢસ્ય વિપર્યાસાત્ પ્રત્યાલીઢાખ્યમણ્ડલમ્ ।
પ્રેઙ્ખણમણ્ડલં –
પ્રસૃત્યૈકપદં પાર્શ્વે પાર્ષ્ણિદેશસ્ય પાદતઃ ॥ ૨૬૬॥

સ્થિત્વાऽન્તે કૂર્મહસ્તેન સ્થિતિઃ પ્રઙ્ખણમણ્ડલમ્ ।
પ્રેરિતમણ્ડલં –
સન્તાડ્યૈકં પદં પાર્શ્વે વિતસ્તિત્રિતયાન્તરમ્ ॥ ૨૬૭॥

તિર્યક્ કુઞ્ચિતજાનુભ્યાં સ્થિત્વાऽથ શિખરં કરમ્ ।
વિધાય વક્ષ્યસ્યન્યેન પ્રસૃતા ચ પતાકિકા ॥ ૨૬૮॥

પ્રદર્શયેદિદં તજ્જ્ઞાઃ પ્રેરિતં મણ્ડલં જગુઃ ।
સ્વસ્તિકમણ્ડલં –
દક્ષિણોત્તરતઃ કુર્યાત્ પાદે પાદં કરે કરમ્ ॥ ૨૬૯॥

વ્યાત્યાસેન તદા પ્રોક્તં સ્વસ્તિકં નામ મણ્ડલમ્ ।
મોટિતમણ્ડલં –
પ્રપદાભ્યાં ભુવિ સ્થિત્વા જાનુયુગ્મેન સંસ્પૃશેત્ ॥ ૨૭૦॥

ક્રમાદ્ ભૂતલમેકૈકં ત્રિપતાકકરદ્વયમ્ ।
કૃત્વા તન્મોટિતં નામ મણ્ડલં કથિતં બુધૈઃ ॥ ૨૭૧॥

સમસૂચીમણ્ડલં –

પાદાગ્રાભ્યાં ચ જાનુભ્યાં ભૂતલં સંસ્પૃશેદ્યદિ ।
મણ્ડલં સમસૂચીતિ કથિતં પૂર્વસૂરિભિઃ ॥ ૨૭૨॥

પાર્શ્વસૂચીમણ્ડલમ્ –
સ્થિત્વા પાદાગ્રયુગ્મેણ જાનુનૈકેન પાર્શ્વતઃ ।
સંસ્પૃશેદ્ ભૂતલં પાર્શ્વ સૂચીમણ્ડલમીરિતમ્ ॥ ૨૭૩॥

સ્થાનકભેદાઃ –
પાદવિન્યાસભેદેન સ્થાનકં ષડ્વિધં ભવેત્ ।
સમપાદં ચૈકપાદં નાગબન્ધસ્તતઃ પરમ્ ॥ ૨૭૪॥

ઐન્દ્રં ચ ગારુડં ચૈવ બ્રહ્મસ્થાનમિતિ ક્રમાત્ ।
સમપાદસ્થાનં –
સ્થિતિઃ સમાભ્યાં પાદાભ્યાં સમપાદમિતિ સ્મૃતમ્ ॥ ૨૭૫॥

વિનિયોગઃ –
પુષ્પાઞ્જલૌ દેવરૂપે સમપાદં નિયુજ્યતે ।
એકપાદસ્થાનં –
જાન્વાશ્રિત્ય પદૈકેન સ્થિતિઃ સ્યાદેકપાદકમ્ ॥ ૨૭૬॥

વિનિયોગઃ –
એકપાદં ત્વિદં સ્થાનં નિશ્ચલે તપસિ સ્થિતમ્ ।
નાગબન્ધસ્થાનં –
પાદં પાદેન સંવેષ્ટ્ય તથા પાણિં ચ પાણિના ॥ ૨૭૭॥

સ્થિતિઃ સ્યાન્નાગબન્ધાખ્યા નાગબન્ધે પ્રયુજ્યતે ।
ઐન્દ્રકસ્થાનં –
પાદમેકં સમાકુઞ્ચ્ય સ્થિત્વાઽન્યપદજાનુની ॥ ૨૭૮॥

ઉત્તાનિતે કરં ન્યસ્ય સ્થિતિરૈન્દ્રમિતીરિતમ્ ।
વિનિયોગઃ –
વાસવે રાજભાવે ચ સ્થાનમૈન્દ્રં નિયુજ્યતે ॥ ૨૭૯॥

ગરુડસ્થાનકં –
આલીઢમણ્ડલે પશ્ચાદથ જાનુતલં ભુવિ ।
સંસ્થાપ્ય પાણિયુગ્મેન વહન વિરલમણ્ડલમ્ (?) ॥ ૨૮૦॥

સ્થિતિસ્તુ ગરુડસ્થાનં ગરુડે વિનિયુજ્યતે ।

બ્રહ્મસ્થાનં –
જાનુપરિ પદં ન્યસ્ય પદસ્યોપરિ જાનુ ચ ॥ ૨૮૧॥

સ્થિતં યદિ ભવેદ્ બ્રાહ્મં જપાદિષુ નિયુજ્યતે ।
ઉત્પ્લવનભેદાઃ –
અથોત્પ્લવનભેદાનાં લક્ષણં પરિકથ્યતે ॥ ૨૮૨॥

અલગં કર્તરી વાઽશ્વોઽત્પ્લવનં મોટિતં તથા ।
કૃપાલગમિતિ ખ્યાતં પઞ્ચધોત્પ્લવનં બુધૈઃ ॥ ૨૮૩॥

અલગોત્પ્લવનં –
ઉત્પ્લુત્ય પાર્શ્વયુગલં કટિદેશે તુ વિન્યસેત્ ।
બધ્વા કરાભ્યાં શિખરૌ અલગોત્પ્લવનં ભવેત્ ॥ ૨૮૪॥

ઉત્પ્લવનકર્તરી –
ઉત્પ્લુત્ય પ્રપદૈઃ સવ્યપાદસ્યૈકસ્ય પૃષ્ઠતઃ ।
કર્તરી વિન્યસેદેષા સ્યાદુત્પ્લુવનકર્તરી ॥ ૨૮૫॥

અધોમુખં ચ શિખરં કટૌ હસ્તં ન્યસેદિહ ।
અશ્વોત્પ્લવનં –
પુરઃ પાદં સમુત્પ્લુત્ય પશ્ચાત્પાદં નિયોજયેત્ ॥ ૨૮૬॥

કરૌ તુ ત્રિપતાખ્યૌ કૃત્વાઽશ્વોત્પ્લવનં ભવેત્ ।
મોટિતોત્પ્લવનં –
પર્યાયપાર્શ્વોત્પ્લવનં કર્તરીવ તુ મોટિતા ॥ ૨૮૭॥

ત્રિપતાકે ચ કરયોઃ કૃત્વા શશ્વત્પ્રકાશનાત્ ।
કૃપાલગોત્પ્લવનં –
પાર્ષ્ણિમેકૈકપાદસ્ય કટૌ પર્યાયતો ન્યસેત્ ॥ ૨૮૮॥

અર્ધચન્દ્રકલામધ્યે ન્યસ્તમન્યત્ કૃપાલગમ્ ।
ભ્રમરીલક્ષણં –
ભ્રમર્યા લક્ષણાન્યત્ર વક્ષ્યે લક્ષણભેદતઃ ॥ ૨૮૯॥

ઉત્પ્લુતભ્રમરી ચક્રભ્રમરી ગરુડાભિધા ।
તથૈકપાદભ્રમરી કુઞ્ચિતભ્રમરી તથા ॥ ૨૯૦॥

આકાશભ્રમરી ચૈવ તથાઙ્ગભ્રમરીતિ ચ ।
ભ્રમર્યઃ સપ્ત વિજ્ઞેયા નાટ્યશાસ્ત્રવિશારદૈઃ ॥ ૨૯૧॥

ઉત્પ્લુભ્રમરી –
સ્થિત્વા સમાભ્યાં પાદાભ્યામુત્પ્લુત્ય ભ્રામયેદ્યદિ ।
સર્વાઙ્ગમન્તરાલે સ્યાદુત્પ્લુતભ્રમરી ત્વસૌ ॥ ૨૯૨॥

ચક્રભ્રમરી –
ભુવિ પાદૌ મુહુઃ કર્ષંસ્ત્રિપતાકૌ કરૌ વહન્ ।
ચક્રવદ્ ભ્રમતે યત્ર સા ચક્રભ્રમરી ભવેત્ ॥ ૨૯૩॥

ગરુડભ્રમરી –
તિર્યક્ પ્રસાર્યૈકપાદં પશ્ચાજ્જાનુ ભુવિ ક્ષિપેત્ ।
સમ્યક્ પ્રસાર્ય બાહૂ દ્વૌ ભ્રામયેદ્ ગરુડો ભવેત્ ॥ ૨૯૪॥

એકપાદભ્રમરી –
ભ્રામયેદેકમેકેન પાદં પાદેન સત્વરમ્ ।
સા ત્વેકપાદભ્રમરી ભવેદિતિ વિનિશ્ચિતા ॥ ૨૯૫॥

કુઞ્ચિતભ્રમરી –
નિકુઞ્ચ્ય જાનુભ્રમણં કુઞ્ચિતભ્રમરી ભવેત્ ।
આકાશભ્રમરી –
ઉત્પ્લુત્ય પાદૌ વિરલૌ કૃત્વા પાદૌ પ્રસાર્ય ચ ॥ ૨૯૬॥

ભ્રામયેત્ સકલં ગાત્રમાકાશભ્રમરી ભવેત્ ।
અઙ્ગભ્રમરી –
વિતસ્ત્યન્તરિતૌ પાદૌ કૃત્વાઙ્ગભ્રમણં તથા ॥ ૨૯૭॥

તિઠેદ્ યદિ ભવેદઙ્ગભ્રમરી ભરતોદિતા ।
ચારિમેદાઃ –
અથાત્ર ચારિભેદાનાં લક્ષણં કથ્યતે મયા ॥ ૨૯૮॥

આદૌ તુ ચલનં પ્રોક્તં પશ્ચાચ્ચઙ્ક્રમણં તથા ।
સરણં વેગિની ચૈવ કુટ્ટનં ચ તતઃ પરમ્ ॥ ૨૯૯॥

લુઠિતં લોલિતં ચૈવ તતો વિષમસઞ્ચરઃ ।
ચારિભેદા અમી અષ્ટૌ પ્રોક્તા ભરતવેદિભિઃ ॥ ૩૦૦॥

ચલનચારિ –
સ્વસ્થાનાત્ સ્વસ્ય પાદસ્ય ચલનાચ્ચલનં ભવેત્ ।

ચઙ્ક્રમણં –
પાદયોર્બાહ્યપાર્શ્વાભ્યામુત્ક્ષિપ્યોત્ક્ષિપ્ય યત્નતઃ ॥ ૩૦૧॥

ગતિર્ભવેચ્ચઙ્ક્રમણં વર્ણિતં નાટ્યકોવિદૈઃ ।
સરણં –
ચલનં તુ જલૂકાવદેકેનાન્યસ્ય પાર્ષ્ણિના ॥ ૩૦૨॥

તિર્યગાકર્ષયેદ્ ભૂમિં કરાભ્યાં તુ પતાકિકે ।
ધૃત્વા ચ ગમનં યત્તુ સરણં તદુદીરિતમ્ ॥ ૩૦૩॥

વેગિની –
પાર્ષ્ણિણા વા પદાગ્રેણ દ્રુતં ગત્યા તુ ચાલનમ્ ।
કરાભ્યાં ચાલપદ્મે ચ ત્રિપતાકે યથાક્રમમ્ ॥ ૩૦૪॥

ધૃત્વા નટેદ્ યદિ ભવેદ્ વેગવત્ત્વેન વેગિની ।
કુટ્ટનં –
પાષ્ણિના વા પદાગ્રેણ સમસ્તેન તલેન વા ॥ ૩૦૫॥

યત્તાડનં ભૂતલસ્ય કુટ્ટનં તદુદીરિતમ્ ।
લુઠિતં –
સ્વસ્તિકસ્થિતિપાદાગ્રે કુટ્ટનાલ્લુઠિતં ભવેત્ ॥ ૩૦૬॥

ઓલિત –
પૂર્વવત્ કુટ્ટનં કૃત્વા મન્દં મન્દમતઃ પરમ્ ।
અસ્પૃષ્ટભૂમેઃ પાદસ્ય ચાલનં લોલિતં ભવેત્ ॥ ૩૦૭॥

વિષમસઞ્ચરઃ –
વેષ્ટયિત્વા દક્ષિણેન વામં વામેન દક્ષિણમ્ ।
ક્રમેણ પાદં વિન્યસ્ય ભવેદ્ વિષમસઞ્ચરઃ ॥ ૩૦૮॥

ગતિમેદાઃ –
અથાત્ર ગતિભેદાનાં લક્ષણં વક્ષ્યતે ક્રમાત્ ।
હંસી મયૂરી ચ મૃગી ગજલીલા તુરઙ્ગિણી ॥ ૩૦૯॥

સિંહી ભુજઙ્ગી મણ્ડૂકી ગતિર્વીરા ચ માનવી ।
દશૈતા ગતયો જ્ઞેયા નાટ્યશાસ્ત્રવિશારદૈઃ ॥ ૩૧૦॥

હઁસીગતિઃ –
પરિવર્ત્ય તનું પાર્શ્વં વિતસ્ત્યન્તરિતં શનૈઃ ।

એકૈકં તત્ પદં ન્યસ્ય કપિત્થં કરયોર્વહન્ ॥ ૩૧૧॥

હંસવદ્ગમનં યત્તુ સા હંસી ગતિરીરિતા ।
મયૂરીગતિઃ –
પ્રપદાભ્યાં ભૂવિ સ્થિત્વા કપિત્થં કરયોર્વહન્ ॥ ૩૧૨॥

એકૈકજાનુચલનાન્મયૂરી ગતિરીરિતા ।
મૃગીગતિઃ –
મૃગવદ્ ગમનં વેગાત્ ત્રિપતાકકરૌ વહન્ ॥ ૩૧૩॥

પુરતઃ પાર્શ્વયોશ્ચૈવ યાનં મૃગગતિર્ભવેત્ ।
ગજલીલાગતિઃ –
પાર્શ્વયોસ્તુ પતાકાભ્યાં કરાભ્યાં વિચરંસ્તતઃ ॥ ૩૧૪॥

સમપાદગતિર્મન્દં ગજલીલેતિ વિશ્રુતા ।
તુરઙ્ગિણીગતિઃ –
ઉત્ક્ષિપ્ય દક્ષિણં પદમુલ્લઙ્ઘ્ય ચ મુહુર્મુહુઃ ॥ ૩૧૫॥

વામેણ શિખરં ધૃત્વા દક્ષિણેન પતાકિકામ્ ।
તુરઙ્ગિણી ગતિઃ પ્રોક્તા નૃત્તશાસ્ત્રવિશારદૈઃ ॥ ૩૧૬॥

સિંહોગતિઃ –
પાદાગ્રાભ્યાં ભુવિ સ્થિત્વા પુર ઉત્પ્લુત્ય વેગતઃ ।
કરાભ્યાં શિખરં ધૃત્વા યાનં સિંહગતિર્ભવેત્ ॥ ૩૧૭॥

ભુજઙ્ગીગતિઃ –
ત્રિપતાકકરૌ ધૃત્વા પાશ્ર્વયોરુભયોરપિ ।
પૂર્વવદ્ગમનં યત્તુ સા ભુજઙ્ગી ગતિર્ભવેત્ ॥ ૩૧૮॥

મણ્ડૂકીગતિઃ –
કરાભ્યાં શિખરં ધૃત્વા કિઞ્ચિત્ સિંહીસમા ગતિઃ ।
મણ્ડૂકી ગતિરિત્યેષા પ્રસિદ્ધા ભરતાગમે ॥ ૩૧૯॥

વીરાગતિઃ –
વામે તુ શિખરં ધૃત્વા દક્ષિણેન પતાકિકા ।
દૂરાદાગમનં યત્તુ વીરા ગતિરુદીરિતા ॥ ૩૨૦॥

માનવીગતિઃ –
મણ્ડલાકારવદ્ ભ્રાન્ત્યા સમાગત્ય મુહુર્મુહુઃ ।

વામં કરં ન્યસ્ય કટૌ દક્ષિણે કટકામુખમ્ ॥ ૩૨૧॥

માનવી ગતિરિત્યેષા પ્રસિદ્ધા પૂર્વસૂરિભિઃ ।
મણ્ડલાનિ પ્રયુક્તાનિ તવૈવોત્પ્લવનાનિ ચ ॥ ૩૨૨॥

ભ્રમર્યશ્ચૈવ ચાર્યશ્ચ ગતયશ્ચ પરસ્પરમ્ ।
એકૈકભેદસમ્બન્ધાદનન્તાનિ ભવન્તિ હિ ॥ ૩૨૬॥

એતાશ્ચ નર્તનવિધૌ શાસ્ત્રતઃ સમ્પ્રદાયતઃ ।
સતામનુગ્રહેણૈવ વિજ્ઞ યૌ નાન્યથા ભુવિ ॥ ૩૨૪॥

ઉપરિષ્ટાદુદ્ધૃતાંશઃ કેવલં એમ-આખ્યાત-
પુસ્તકે મણ્ડલભેદેભ્યઃ પ્રાગધિકો દૃશ્યતે ।
અર્થ અષ્ટરસાઃ –
શૃઙ્ગારવીરકરુણાદ્ભુતહાસ્યભયાનકાઃ ।
બીભત્સરૌદ્રો ચ રસા શૃઙ્ગારઃ શુચિરુજ્જ્વલઃ ॥

અવસ્થાભેદાઃ –
શ્રુત્યક્ષિપ્રીતિહૃત્સઙ્ગાઃ સઙ્કલ્પો જાગરસ્તથા ।
તનુતા ચાપિ વિષયનિવૃત્તિશ્ચાત્રપા તથા ॥

મોહો મૂર્છા ચ મરણમિત્યવસ્થાઃ પ્રપશ્ચતાઃ ।
ચક્ષુઃપ્રીતિશ્ચ ચિન્તા ચ સઙ્કલ્પો ગુણકીર્તનમ્ ॥

ક્રિયાદ્વેષશ્ચ તાપશ્ચ લજ્જાત્યાગસ્તતઃ પરમ્ ।
ઉન્માદમૂર્છામૃતય ઇત્યવસ્થા સ્મૃતાઃ પરૈઃ ॥

નયનૈર્જનયેદ્ ભાવં ભાવાત્ સ્પર્શં સમાચરેત્ ।
સ્પર્શેન દ્રવમુત્પાદ્ય રતિં પશ્ચાત્ સમાચરેત્ ॥

ચિન્તા –
કિં કરિષ્યતિ કિં ધ્યાયેત્ ક્વાસ્તે કિં વક્તિ ભામિની ।
ઇતીવ માનસોત્કણ્ઠા સા ચિન્તા પરિકીર્તિતા ॥

સઙ્કલ્પઃ –
યામિ તામરવિન્દાક્ષીં પિવામ્યધરપલ્લવમ્ ।
રમામિ નિતરાં સાર્ધં તયેતિ સુદૃઢં પુનઃ ॥

તાં વિના ન હિ જીવામિ સૈવ મે પરમં ધનમ્ ।

ઇતઃ પરં સા શરણમિતિ સઙ્કલ્પ ઈરિતઃ ॥

ગુણકીતનં –
એષા મૌલિવિભૂષણં મૃગદૃશામેષા પરં જીવનં
તાં ત્યક્ત્વા ન હિ કિઞ્ચિદસ્તિ શરણં યૂનાં રસોલ્લાસિની ।
સા ભૂષા ભુવનસ્ય કિમ્પુનરિયં વાચા પર જીવન-
મિત્યેવં પ્રતિભાતિ યા ગુણનુતિઃ સ્ત્રીપુમ્પ્રભેદેઽપિ સા ॥

ક્રિયાદ્વેષઃ –
ગચ્છ ગચ્છસિ ચેતાં તો નાહં કાન્તા ન મે પતિઃ ।
ત્વં ચેતિ કથનં યત્ર કથનં દ્વેષ ઉચ્યતે ॥

તાપઃ –
કિં કરોતિ સુમાસ્ત્રો માં પઞ્ચભિબાણસઞ્ચયૈઃ ।
તપત્યનન્તરં ગાત્રં તાપોઽસૌ પરિકીર્તિતઃ ॥

લજ્જાત્યાગઃ –
દોર્ભ્યાં સમાશ્લિષ્ય પયોધરૌ તૌ પ્રચુમ્બ્ય બિમ્બાધરમાયતાક્ષ્યાઃ ।
સુખેન સુપ્તઃ શયને નિશાયામુદ્બોધિતોઽહં ચરણાયુધેન ॥

ઉન્માદઃ –
ચિત્રે લિખિતમાલોક્ય નાયકં કઞ્ચનાઙ્ગના ।
પરિરમ્ય દૃઢં દોર્ભ્યાં ચુચુમ્બે ગણ્ડયોરમુમ્ ॥

મૂર્છા –
યત્રાઙ્ગનાયા વૈકલ્યં પઞ્ચપ્રાણનિરોધનમ્ ।
અસઙ્ગા યામમાત્રં સા મૂર્છા વાન્યા મૃતિર્ન હિ ॥

ઇતિ શ્રીનન્દિકેશ્વરવિરચિતં અભિનયદર્પણં સમાપ્તમ્ ।

Encoded by Ryan Armstrong ryanarm at gmail.com
Proofread by Ryan Armstrong, Krithi Durbaka

*Abhinayadarpanam by Nandikeshvara*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*